॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ६

तैर्वध्यमाना देवाश्च ऋषयश्च तपोधनाः ।
भयार्ताः शरणं जग्मुर्देवदेवं महेश्वरम् ॥१॥

ते समेत्य तु कामारिं त्रिपुरारिं त्रिलोचनम् ।
ऊचुः प्राञ्जलयो देवा भयगद्गदभाषिणः ॥२॥

सुकेशपुत्रैर्भगवन्पितामहवरोद्धतैः ।
प्रजाध्यक्ष प्रजाः सर्वा बाध्यन्ते रिपुबाधन ॥३॥

शरण्यान्यशरण्यानि आश्रमाणि कृतानि नः ।
स्वर्गाच्च च्यावितः शक्रः स्वर्गे क्रीडन्ति शक्रवत् ॥४॥

अहं विष्णुरहं रुद्रो ब्रह्माहं देवराड् अहम् ।
अहं यमोऽहं वरुणश्चन्द्रोऽहं रविरप्यहम् ॥५॥

इति ते राक्षसा देव वरदानेन दर्पिताः ।
बाधन्ते समरोद्धर्षा ये च तेषां पुरःसराः ॥६॥

तन्नो देवभयार्तानामभयं दातुमर्हसि ।
अशिवं वपुरास्थाय जहि दैवतकण्टकान् ॥७॥

इत्युक्तस्तु सुरैः सर्वैः कपर्दी नीललोहितः ।
सुकेशं प्रति सापेक्ष आह देवगणान्प्रभुः ॥८॥

नाहं तान्निहनिष्यामि अवध्या मम तेऽसुराः ।
किं तु मन्त्रं प्रदास्यामि यो वै तान्निहनिष्यति ॥९॥

एवमेव समुद्योगं पुरस्कृत्य सुरर्षभाः ।
गच्छन्तु शरणं विष्णुं हनिष्यति स तान्प्रभुः ॥१०॥

ततस्ते जयशब्देन प्रतिनन्द्य महेश्वरम् ।
विष्णोः समीपमाजग्मुर्निशाचरभयार्दिताः ॥११॥

शङ्खचक्रधरं देवं प्रणम्य बहुमान्य च ।
ऊचुः सम्भ्रान्तवद्वाक्यं सुकेशतनयार्दिताः ॥१२॥

सुकेशतनयैर्देवत्रिभिस्त्रेताग्निसंनिभैः ।
आक्रम्य वरदानेन स्थानान्यपहृतानि नः ॥१३॥

लङ्का नाम पुरी दुर्गा त्रिकूटशिखरे स्थिता ।
तत्र स्थिताः प्रबाधन्ते सर्वान्नः क्षणदाचराः ॥१४॥

स त्वमस्मत्प्रियार्थं तु जहि तान्मधुसूदन ।
चक्रकृत्तास्यकमलान्निवेदय यमाय वै ॥१५॥

भयेष्वभयदोऽस्माकं नान्योऽस्ति भवता समः ।
नुद त्वं नो भयं देव नीहारमिव भास्करः ॥१६॥

इत्येवं दैवतैरुक्तो देवदेवो जनार्दनः ।
अभयं भयदोऽरीणां दत्त्वा देवानुवाच ह ॥१७॥

सुकेशं राक्षसं जाने ईशान वरदर्पितम् ।
तांश्चास्य तनयाञ्जाने येषां ज्येष्ठः स माल्यवान् ॥१८॥

तानहं समतिक्रान्तमर्यादान्राक्षसाधमान् ।
सूदयिष्यामि सङ्ग्रामे सुरा भवत विज्वराः ॥१९॥

इत्युक्तास्ते सुराः सर्वे विष्णुना प्रभविष्णुना ।
यथा वासं ययुर्हृष्टाः प्रशमन्तो जनार्दनम् ॥२०॥

विबुधानां समुद्योगं माल्यवान्स निशाचरः ।
श्रुत्वा तौ भ्रातरौ वीराविदं वचनमब्रवीत् ॥२१॥

अमरा ऋषयश्चैव संहत्य किल शङ्करम् ।
अस्मद्वधं परीप्सन्त इदमूचुस्त्रिलोचनम् ॥२२॥

सुकेशतनया देव वरदानबलोद्धताः ।
बाधन्तेऽस्मान्समुद्युक्ता घोररूपाः पदे पदे ॥२३॥

राक्षसैरभिभूताः स्म न शक्ताः स्म उमापते ।
स्वेषु वेश्मसु संस्थातुं भयात्तेषां दुरात्मनाम् ॥२४॥

तदस्माकं हितार्थे त्वं जहि तांस्तांस्त्रिलोचन ।
राक्षसान्हुङ्कृतेनैव दह प्रदहतां वर ॥२५॥

इत्येवं त्रिदशैरुक्तो निशम्यान्धकसूदनः ।

शिरः करं च धुन्वान इदं वचनमब्रवीत् ॥ २६॥

अवध्या मम ते देवाः सुकेशतनया रणे ।
मन्त्रं तु वः प्रदास्यामि यो वै तान्निहनिष्यति ॥ २७॥

यः स चक्रगदापाणिः पीतवासा जनार्दनः ।
हनिष्यति स तान्युद्धे शरणं तं प्रपद्यथ ॥ २८॥

हरान्नावाप्य ते कामं कामारिमभिवाद्य च ।
नारायणालयं प्राप्तास्तस्मै सर्वं न्यवेदयन् ॥ २९॥

ततो नारायणेनोक्ता देवा इन्द्रपुरोगमाः ।
सुरारीन्सूदयिष्यामि सुरा भवत विज्वराः ॥ ३०॥

देवानां भयभीतानां हरिणा राक्षसर्षभौ ।
प्रतिज्ञातो वधोऽस्माकं तच्चिन्तयथ यत्क्षमम् ॥ ३१॥

हिरण्यकशिपोर्मृत्युरन्येषां च सुरद्विषाम् ।
दुःखं नारायणं जेतुं यो नो हन्तुमभीप्सति ॥ ३२॥

ततः सुमाली माली च श्रुत्वा माल्यवतो वचः ।
ऊचतुर्भ्रातरं ज्येष्ठं भगांशाविव वासवम् ॥ ३३॥

स्वधीतं दत्तमिष्टं च ऐश्वर्यं परिपालितम् ।
आयुर्निरायमं प्राप्तं स्वधर्मः स्थापितश्च नः ॥ ३४॥

देवसागरमक्षोभ्यं शस्त्रौघैः प्रविगाह्य च ।
जिता देवा रणे नित्यं न नो मृत्युकृतं भयम् ॥ ३५॥

नारायणश्च रुद्रश्च शक्रश्चापि यमस्तथा ।
अस्माकं प्रमुखे स्थातुं सर्व एव हि बिभ्यति ॥ ३६॥

विष्णोर्दोषश्च नास्त्यत्र कारणं राक्षसेश्वर ।
देवानामेव दोषेण विष्णोः प्रचलितं मनः ॥ ३७॥

तस्मादद्य समुद्युक्ताः सर्वसैन्यसमावृताः ।
देवानेव जिघांसामो येभ्यो दोषः समुत्थितः ॥ ३८॥

इति माली सुमाली च माल्यवानग्रजः प्रभुः ।
उद्योगं घोषयित्वाथ राक्षसाः सर्व एव ते ।
युद्धाय निर्ययुः क्रुद्धा जम्भवृत्रबला इव ॥ ३९॥

स्यन्दनैर्वारणेन्द्रैश्च हयैश्च गिरिसंनिभैः ।
खरैर्गोभिरथोष्ट्रैश्च शिंशुमारैर्भुजं गमैः ॥ ४०॥

मकरैः कच्छपैर्मीनैर्विहङ्गैर्गरुडोपमैः ।
सिंहैर्व्याघ्रैर्वराहैश्च सृमरैश् चमरैरपि ॥ ४१॥

त्यक्त्वा लङ्कां ततः सर्वे राक्षसा बलगर्विताः ।
प्रयाता देवलोकाय योद्धुं दैवतशत्रवः ॥ ४२॥

लङ्काविपर्ययं दृष्ट्वा यानि लङ्कालयान्यथ ।
भूतानि भयदर्शीनि विमनस्कानि सर्वशः ॥ ४३॥

भौमास्तथान्तरिक्षाश्च कालाज्ञप्ता भयावहाः ।
उत्पाता राक्षसेन्द्राणामभावायोत्थिता द्रुतम् ॥ ४४॥

अस्थीनि मेघा वर्षन्ति उष्णं शोणितमेव च ।
वेलां समुद्रोऽप्युत्क्रान्तश्चलन्ते चाचलोत्तमाः ॥ ४५॥

अट्टहासान्विमुञ्चन्तो घननादसमस्वनान् ।
भूताः परिपतन्ति स्म नृत्यमानाः सहस्रशः ॥ ४६॥

गृध्रचक्रं महच्चापि ज्वलनोद्गारिभिर्मुखैः ।
राक्षसानामुपरि वै भ्रमते कालचक्रवत् ॥ ४७॥

तानचिन्त्यमहोत्पातान्राक्षसा बलगर्विताः ।
यन्त्येव न निवर्तन्ते मृत्युपाशावपाशिताः ॥ ४८॥

माल्यवांश्च सुमाली च माली च रजनीचराः ।
आसन्पुरःसरास्तेषां क्रतूनामिव पावकाः ॥ ४९॥

माल्यवन्तं तु ते सर्वे माल्यवन्तमिवाचलम् ।
निशाचरा आश्रयन्ते धातारमिव देहिनः ॥ ५०॥

तद्बलं राक्षसेन्द्राणां महाभ्रघननादितम् ।
जयेप्सया देवलोकं ययौ माली वशे स्थितम् ॥ ५१॥

राक्षसानां समुद्योगं तं तु नारायणः प्रभुः ।
देवदूतादुपशुत्य दध्रे युद्धे ततो मनः ॥ ५२॥

स देवसिद्धर्षिमहोरगैश् च
गन्धर्वमुख्याप्सरसोपगीतः ।
समाससादामरशत्रुसैन्यं
चक्रासिसीरप्रवरादिधारी ॥ ५३॥

सुपर्णपक्षानिलनुन्नपक्षं
भ्रमत्पताकं प्रविकीर्णशस्त्रम् ।
चचाल तद्राक्षसराजसैन्यं
चलोपलो नील इवाचलेन्द्रः ॥ ५४॥

तथ शितैः शोणितमांसरूषितैर्

युगान्तवैश्वानरतुल्यविग्रहैः ।
निशाचराः सम्परिवार्य माधवं
वरायुधैर्निर्बिभिदुः सहस्रशः ॥ ५५ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com